# श्री तुलसी स्तोत्रम्

जगद्धात्रि नमस्तुभ्यं विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मोदयो देवाः सृष्टिस्थित्यंतकारिणः ॥ 1

नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः संपत्प्रदायिके ॥ 2

तुलसी पातु मां नित्यं सर्वापद्भ्योपि सर्वदा ।
कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ 3

नमामि शिरसा देवीं तुलसीं विलसत्तनुम् ।
यां दृष्ट्वा पापिनो मर्त्याः मुच्यंते सर्वकिल्बिषात् ॥ 4

तुलस्या रक्षितं सर्वं जगदेतच्चराचरम् ।
या विनिर्हन्ति पापानि दृष्टा वा पापिभिर्न रैः ॥ 5

नमस्तुलस्यतितरां यस्यै बद्ध्वांजलिं कलौ ।
कलयंतिसुखं सर्वं स्त्रियो वैश्यास्तथापरे ॥ 6

तुलस्या नापरं किंचिद्दैवतं जगतीतले ।
यथा पवित्रितो लोको विष्णुसंगेन वैष्णवः ॥ 7

तुलस्याः पल्लवं विष्णोः शिरस्यारोपितं कलौ ।
आरोपयति सर्वाणि श्रेयांसि वरमस्तके ॥ 8

© 2022 Vedam Nadam

तुलस्यां सकला देवा वसंति सततं यतः ।
अतस्ता मर्चयेल्लोके सर्वान् देवान् समर्चयन् ॥ 9

नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे ।
पाहि मां सर्वपापेभ्यः सर्वसंपत्प्रदायिके ॥ 10

इति स्तोत्रं पुरा गीतं पुंडरीकेण धीमता ।
विष्णु मर्चयता नित्यं शोभनैस्तुलसीदलैः ॥ 11

तुलसी श्रीमहलक्ष्मीर्विद्या विद्या यशस्विनी ।
धर्म्याधर्मानना देवी देवदेवमनःप्रिया ॥ 12

लक्ष्मीप्रियसखी देवी द्यौर्भूमि रचला चला ।
षोडशैतानि नामानि तुलस्याः कीर्तयन्नरः ॥ 13

लभते सुतरां भक्ति मंते विष्णुपदं लभेत् ।
तुलसी भूर्महलक्ष्मीः पद्मिनी श्रीर्हरिप्रिया ॥ 14

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारदनुते नारायण मनःप्रिये ॥ 15

॥ इति श्रीपुंडरीक कृतं तुलसीस्तोत्रम् संपूर्णम् ॥

© 2022 Vedam Nadam